# shrInaTarAjakunchitapAdasahasranamastotram

# શ્રીનટરાજકુઞ્ચિતપાદસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrI naTarAjakunchitapAda sahasranAmastotram

File name : naTarAjakunchitapAdasahasranAmastotra.itx

Category : sahasranAma, shiva

Location : doc_shiva

Proofread by : DPD

Description-comments : Mahaperiaval trust publication

Latest update : August 23, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીનટરાજકુઞ્ચિતપાદસહસ્રનામસ્તોત્રમ્

॥ શ્રીગુરુભ્યો નમઃ ॥

॥ શ્રીશિવકામસુન્દરીસમેત શ્રીનટરાજઃ શરણમ્ ॥

યસ્માત્સર્વં સમુત્પન્નં ચરાચરમિદં જગત્ ।
ઇદં નમોનટેશાય તસ્મૈ કારુણ્યમૂર્તયે ॥ ૧॥

કૈલાસશિખરે રમ્યે રત્નસિંહાસને સ્થિતમ્ ।
શઙ્કરં કરુણામૂર્તિં પ્રણમ્ય પરયા મુદા ॥ ૨॥

વિનયાવનતા ભૂત્વા પપ્રચ્છ પરમેશ્વરી ।
ભગવન્! ભવ! સર્વજ્ઞ! ભવતાપહરાવ્યય ॥ ૩॥

ત્વત્તઃ શ્રુતં મયા દેવ! સર્વં નામસહસ્રકમ્ ।
નટેશસ્યાપિ નામાનિ સુશ્રુતાનિ મયા પ્રભો! ॥ ૪॥

ત્વત્તઃ શ્રેષ્ઠતમઃ પાદઃ કુઞ્ચિતઃ પદ્મસન્નિભઃ ।
તસ્માત્તન્નામ સાહસ્રં શ્રોતુમિચ્છામિ શઙ્કર! ॥ ૫॥

અસકૃત્પ્રાર્થિતોઽપિ ત્વં ન તત્કથિતવાનસિ ।
ઇદાનીં કૃપયા શમ્ભો! વદ વાઞ્છાભિપૂર્તયે ॥ ૬॥

શ્રીશિવ ઉવાચ
સાધુ સાધુ મહાદેવિ! પૃષ્ટં સર્વજગદ્ધિતમ્ ।
પુરા નારાયણઃ શ્રીમાન્ લોકરક્ષાપરાયણઃ ॥ ૭॥

ક્ષીરાબ્ધૌ સુચિરં કાલં સામ્બમૂર્તિધરં શિવમ્ ।
મામેકાગ્રેણ ચિત્તેન ધ્યાયન્ ન્યવસદચ્યુતઃ ॥ ૮॥

તપસા તસ્ય સન્તુષ્ટઃ પ્રસન્નોઽહં કૃપાવશાત્ ।
ધ્યાનાત્સમુત્થિતો વિષ્ણુર્લક્ષ્મ્યા માં પર્યપૂજયત્ ॥ ૯॥

તુષ્ટાવ વિવિધૈસ્સ્તોત્રૈર્વેદવેદાન્તસમ્મિતૈઃ ।

વરં વરય હે વત્સ! યદિષ્ટં મનસિ સ્થિતમ્ ॥ ૧૦॥

તત્તે દાસ્યામિ ન ચિરાદિત્યુક્તઃ કમલેક્ષણઃ ।
પ્રાહ માં પરયા ભક્ત્યા વરં દાસ્યસિ ચેત્પ્રભો ॥ ૧૧॥

રક્ષાર્થં સર્વજગતામસુરાણા ક્ષયાય ચ ।
સાર્વાત્મ્યયોગસિદ્ધ્યર્થં મન્ત્રમેકં મમાદિશ ॥ ૧૨॥

ઇતિ સમ્પ્રાર્થિતસ્તેન માધવેનાહમમ્બિકે ।
સઞ્ચિન્ત્યાનુત્તમ સ્તોત્રં સર્વેષાં સર્વસિદ્ધિદમ્ ॥ ૧૩॥

નટેશકુઞ્ચિતાઙ્ઘ્રેસ્તુ નામસાહસ્રમુત્તમમ્ ।
લક્ષ્મીકાન્તાય ભક્તાય ઉક્તવાનસ્મિ શઙ્કરિ! ॥ ૧૪॥

તેન જિત્વાઽસુરાન્ સર્વાન્ રરક્ષ સકલં જગત્ ।
સાર્વાત્મ્યયોગસિદ્ધિં ચ પ્રાપ્તવાનમ્બુજેક્ષણઃ ॥ ૧૫॥

તદેવ પ્રાર્થયસ્યદ્ય નામસાહસ્રમમ્બિકે ।
પઠનાન્મનનાદ્યસ્ય નૃત્તં દર્શયતિ પ્રભુઃ ॥ ૧૬॥

સર્વપાપહરં પુણ્યં સર્વરક્ષાકરં નૃણામ્ ।
સર્વૈશ્વર્યપ્રદં સર્વસિદ્ધિદં મુક્તિદં પરમ્ ॥ ૧૭॥

વક્ષ્યામિ શ઼ૃણુ હે દેવિ! નામસાહસ્રમુત્તમમ્ ।

અસ્ય શ્રી શિવકામસુન્દરીસમેત શ્રી નટરાજરાજકુઞ્ચિતપાદસહસ્રનામસ્તોત્ર
મહામન્ત્રસ્ય સદાશિવ ઋષિઃ, મહાવિરાટ્ છન્દઃ,
શ્રીશિવકામસુન્દરીસમેતશ્રીનટરાજરાજો દેવતા । બીજં, શક્તિઃ,કલિકં,
અઙ્ગન્યાસકરન્યાસૌ ચ ચિન્તામણિ મન્ત્રવત્ ॥

ૐ શ્રીશિવાય નમઃ ઇતિ બીજમ્ । ૐ અનન્તશક્તયે નમઃ ઇતિ શક્તિઃ ।
મહેશ્વરાય નમઃ ઇતિ કીલકમ્ । શ્રીનટેશ્વરપ્રસાદસિદ્ધ્યર્થે નામપરાયણે
અર્ચને વિનિયોગઃ ।
ૐ નમ્યાય નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ । સ્વાહા નમઃ -તર્જનીભ્યાં સ્વાહા
(નમઃ) ૐ વષટ્કારાય નમઃ -મધ્યમાભ્યાં વષટ્ (નમઃ) । ૐ હુઙ્કારાય
નમઃ -અનામિકાભ્યાં હું (નમઃ) ૐ વૌષટ્કારાય નમઃ । કનિષ્ઠિકષ્ઠયા
વૌષટ્ (નમઃ) ૐ ફટ્કારાય નમઃ - કરતલકરપૃષ્ઠાભ્યાં ફટ્ (નમઃ)
। ૐ નમ્યાય નમઃ - હૃદયાય નમઃ । ૐ સ્વાહા નમઃ શિરસે સ્વાહા ।
ૐ વષટ્કારાય નમઃ - શિખાયૈ વષટ્ । ૐ હુઙ્કારાય નમઃ - કવચાય

હુમ્ । ૐ વૌષટ્કારાય નમઃ - નેત્રત્રયાય વૌષટ્ । ૐ ફટ્કરાય નમઃ -
અસ્ત્રાય ફટ્ । ૐ ભૂર્ભુવસ્સુવરોં ઇતિ દિગ્બન્ધઃ ।

ધ્યાનમ્
ધ્યાયેત્કોટિરવિપ્રભં ત્રિનયનં શીતાંશુગઙ્ગાધરં
દક્ષાઙ્ઘ્રિસ્થિતવામકુઞ્ચિતપદં શાર્દૂલચર્મામ્બરમ્ ।
વહ્નિં ડોલકરાભયં ડમરુકં વામે શિવાં શ્યામલાં
કલ્હારાં જપસ્રક્ષુકાં કટિકરાં દેવીં સભેશં ભણે ॥ ૧॥

ફાલે રત્નત્રિપુણ્ડ્રં ફણિનમપિ ગલે પાદપીઠે ચ ભૂતં
બાહ્વોર્વહ્નિં ચ ઢક્કં વદનસરસિજે સૂર્યચન્દ્રૌ શિખીન્દ્રમ્ ।
ઓઙ્કારાખ્યપ્રભાયાં સુરભુવનગણં પાર્શ્વયોર્વાદ્યકારૌ યઃ
કૃત્વાઽઽનન્દનૃત્તં સ્વસદસિ કુરુતે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨॥

ઊરુન્યાસસુડોલ - વહ્નિ - શુકભૃદ્વામં કરામ્ભોરુહં
ઢક્કાચ્છાક્ષસ્રગુત્પલાભયકરં વામં પદં કુઞ્ચિતમ્ ।
ઉદ્ધૃત્યાધરભૂત પૃષ્ઠવિલસદ્દક્ષાઙ્ઘ્રિમર્ધામ્બિકં
સામીવસ્ત્રસુવેણિદૃક્કુચભરં ધ્યાયેન્નટં મેલનમ્ ॥ ૩॥

ધ્યાયેદાત્મવિમોહસંસ્થિતપદં રક્તાંશુકં શઙ્કરં
કિઞ્ચિત્કુઞ્ચિતવામપાદમતુલં વ્યાલમ્બબાહું ત્રિભિઃ ।
વામે પૌણ્ડ્ર ધનુશ્ચ પાશદહનૌ દક્ષે કરે ચાભયં
પૌષ્પં માર્ગણમઙ્કુશં ડમરુકં બિભ્રાણમચ્છચ્છવિમ્ ॥ ૪॥

॥ અથ સહસ્રનામસ્તોત્રમ્ ॥

અખણ્ડબોધોઽખણ્ડાત્મા ઘણ્ટામણ્ડલમણ્ડિતઃ ।
અખણ્ડાનન્દચિદ્રૂપઃ પરમાનન્દતાણ્ડવઃ ॥ ૧॥

અગમ્યમહિમામ્ભોધિઃ અનૌપમ્યયશોનિધિઃ ।
અગ્રેવધોઽગ્રેસમ્પૂજ્યો હન્તા તારો મયોભવઃ ॥ ૨॥

અઘોરોઽદ્ભુતચારિત્ર આનન્દવપુરગ્રણીઃ ।
અજીર્ણસ્સુકુમારોઽન્યઃ પારદર્શી પુરન્દરઃ ॥ ૩॥

અતર્ક્યસ્સુકરસ્સારઃ સત્તામાત્રસ્સદાશિવઃ ।
અનન્તરૂપ એકાત્મા સ્વસ્તરુર્વ્યાહૃતિઃ સ્વધા ॥

અનન્તશક્તિરાચાર્યઃ પુષ્કલસ્સર્વપૂરણઃ ।

અનર્ઘરત્નખચિતકિરીટો નિકટેસ્થિતઃ ॥ ૫॥

અનહઙ્કૃતિરચ્છેદ્યસ્સ્વાનન્દૈકઘનાકૃતિઃ ।
અનાવરણવિજ્ઞાનો નિર્વિભાગો વિભાવસુઃ ॥ ૬॥

અનિર્દેશ્યોઽનિલોઽગમ્યોઽવિક્રિયોઽમોઘવૈભવઃ ।
અનુત્તમઃ પરોદાસો મુક્તિદો મુદિતાનનઃ ॥ ૭॥

અન્નાનાં પતિરત્યુગ્રો હરિધ્યેયોઽદ્વયાકૃતિઃ ।
અપરોક્ષોઽવ્રણોઽલિઙ્ગોઽપ્યદ્રેષ્ટા પ્રેમસાગરઃ ॥ ૮॥

અપર્યન્તોઽપરિચ્છેદ્યોઽગોચરો રુગ્વિમોચકઃ ।
અપસ્મૃતિન્યસ્તપાદઃ કૃત્તિવાસાઃ કૃપાકરઃ ॥ ૯॥

અપ્રમેયોઽપ્રતિરથઃ પ્રદ્યુમ્નઃ પ્રમથેશ્વરઃ ।
અમાની મદનોઽમન્યુરમાનો માનદો મનુઃ ॥ ૧૦॥

અમૂલ્યમણિસભાસ્વત્ફણીન્દ્રકરકઙ્કણઃ ।
અરુણઃ શરણઃ શર્વઃ શરણ્ય શર્મદઃ શિવઃ ॥ ૧૧॥

અવશસ્સ્વવશસ્સ્થાસ્નુરન્તર્યામી શતક્રતુઃ ।
અશુભક્ષયકૃજ્જ્યોતિરનાકાશસ્ત્વલેપકઃ ॥ ૧૨॥

અસ્નેહસ્સઙ્ગનિર્મુક્તોઽહ્રસ્વોઽદીર્ઘોઽવિશેષકઃ
અક્ષરસ્ત્ર્યક્ષરસ્ત્રયક્ષઃ પક્ષપાતવિવર્જિતઃ ॥ ૧૩॥

આતતાવી મહારુદ્રઃ ક્ષેત્રાણામધિપોઽક્ષદઃ ।
આતન્વાનશ્શતાનન્દો ગૃત્સો ગૃત્સપતિસ્મૃરઃ ॥ ૧૪॥

આદિત્યવર્ણસ્સગ્જ્યોતિસ્સમ્યગ્દર્શનતત્પરઃ ।
આદિભૂતો મહાભૂતસ્સ્વેચ્છાકલિતવિગ્રહઃ ॥ ૧૫॥

આપ્તકામોઽનુમન્તાઽઽત્મકામોઽભિન્નોઽનણુર્હરઃ ।
આભાસ્વરઃ પરન્તત્વમાદિમઃ પેશલઃ પવિઃ ॥ ૧૬॥

આવ્યાધિપતિરાદિત્યઃ કકુભઃ કાલકોવિદઃ ।
ઇચ્છાનિચ્છાવિરહિતો વિહારી વીર્યવર્ધનઃ ॥ ૧૭॥

ઉદ્દણ્ડતાણ્ડવશ્ચણ્ડ ઊર્ધ્વતાણ્ડવપણ્ડિતઃ ।
ઉદાસીનૌપદ્રષ્ટા મૌનગમ્યો મુનીશ્વરઃ ॥ ૧૮॥

ઊર્ધ્વપાદૂર્ધ્વરેતાશ્ચ પ્રૌઢનર્તનલમ્પટઃ ।
ઓષધીશસ્સતામીશૌચ્ચૈર્ઘોષો વિભીષણઃ ॥ ૧૯॥

કન્દર્પ કોટિસદૃશઃ કપર્દી કમલાનનઃ ।
કપાલમાલાભરણઃ કઙ્કાલઃ કલિનાશનઃ ॥ ૨૦॥

કપાલમાલાલઙ્કારઃ કાલાન્તકવપુર્ધરઃ ।
કમનીયઃ કલાનાથશેખરઃ કમ્બુકન્ધરઃ ॥ ૨૧॥

કમનીયનિજાનન્દમુદ્રાઞ્ચિતકરામ્બુજઃ ।
કરાબ્જધૃતકાલાગ્નિઃ કદમ્બકુસુમારુણઃ ॥ ૨૨॥

કરિચર્મામ્બરધરઃ કપાલી કલુષાપહઃ ।
કલ્યાણમૂર્તિઃ કલ્યાણીરમણઃ કમલેક્ષણઃ ॥ ૨૩॥

કક્ષપશ્ચ ભુવન્તિશ્ચ ભવાખ્યો વારિવસ્કૃતઃ ।
કાલકણ્ઠઃ કાલકાલઃ કાલકૂટવિષાશનઃ ॥ ૨૪॥

કાલનેતા કાલહન્તા કાલચક્રપ્રવર્તકઃ ।
કાલજ્ઞઃ કામદઃ કાન્તઃ કામારિઃ કામપાલકઃ ॥ ૨૫॥

કાલાત્મા કાલિકાનાથઃ કાર્કોટકવિભૂષણઃ ।
કાલિકાનાટ્યરસિકો નિશાનટનનિશ્ચલઃ ॥ ૨૬॥

કાલીવાદપ્રિયઃ કાલઃ કાલાતીતઃ કલાધરઃ ।
કુઠારભૃત્કુલાદ્રીશઃ કુઞ્ચિતૈકપદામ્બુજઃ ॥ ૨૭॥

કુલુઞ્ચાનાં પતિઃ કૂપ્યો ધન્વાવી ધનદાધિપઃ ।
કૂટસ્થઃ કૂર્મપીઠસ્થઃ કૂશ્માણ્ડગ્રહમોચકઃ ॥ ૨૮॥

કૂલઙ્કષકૃપાસિન્ધુઃ કુશલી કુઙ્કુમેશ્વરઃ ।
કૃતજ્ઞઃ કૃતિસારજ્ઞઃ કૃશાનુઃ કૃષ્ણપિઙ્ગલઃ ॥ ૨૯॥

કૃતાકૃતઃ કૃશઃ કૃષ્ણઃ શાન્તિદઃ શરભાકૃતિઃ ।
કૃતાન્તકૃત્ક્રિયાધારઃ કૃતી કૃપણરક્ષકઃ ॥ ૩૦॥

કેવલઃ કેશવઃ કેલીકરઃ કેવલનાયકઃ ।
કૈલાસવાસી કામેશઃ કવિઃ કપટવર્જિતઃ ॥ ૩૧॥

કોટિકન્દર્પસૌભાગ્યસુન્દરો મધુરસ્મિતઃ ।
ગદાધરો ગણસ્વામી ગરિષ્ઠસ્તોમરાયુધઃ ॥ ૩૨॥

ગર્વિતો ગગનાવાસો ગ્રન્થિત્રય વિભેદનઃ ।
ગહ્વરેષ્ઠો ગણાધીશો ગણેશો ગતિવર્જિતઃ ॥ ૩૩ ॥

ગાયકો ગરુડારૂઢો ગજાસુરવિમર્દનઃ ।
ગાયત્રીવલ્લભો ગાર્ગ્યો ગાયકાનુગ્રહોન્મુખઃ ॥ ૩૪ ॥

ગુહાશયો ગુણાતીતો ગુરુમૂર્તિર્ગુહપ્રિયઃ ।
ગૂઢો ગુહ્યતરો ગોપ્યો ગોરક્ષી ગણસેવિતઃ ॥ ૩૫ ॥

ચતુર્ભુજશ્શતતનુઃ શમિતાખિલ કૌતુકઃ ।
ચતુર્વક્ત્રશ્ચક્રધરઃ પઞ્ચવક્ત્રઃ પરન્તપ ॥ ૩૬ ॥

ચિચ્છક્તિલોચનાનન્દકન્દલઃ કુન્દપાણ્ડરઃ ।
ચિદાનન્દનટાધીશઃ ચિત્કેવલવપુર્ધરઃ ॥ ૩૭ ॥

ચિદેકરસસમ્પૂર્ણઃ હ્રીં શિવશ્શ્રીમહેશ્વરઃ ।
ચૈતન્યં ચિચ્છિદ્દ્વૈતશ્ચિન્માત્રશ્ચિત્સભાધિપઃ ॥ ૩૮ ॥

જટાધરોઽમૃતાધારોઽમૃતાંશુરમૃતોદ્ભવઃ ।
જટિલશ્ચટુલાપાઙ્ગો મહાનટનલમ્પટઃ ॥ ૩૯ ॥

જનાર્દનો જગત્સ્વામી જન્મકર્મનિવારકઃ ।
જવનો જગદાધારો જમદગ્નિર્જરાહરઃ ॥ ૪૦ ॥

જહ્નુકન્યાધરો જન્મજરામૃત્યુનિવારકઃ ।
ણાન્તનાદિનામયુક્તવિષ્ણુનમ્યપદામ્બુજઃ ॥ ૪૧ ॥

તત્ત્વાવબોધસ્તત્વેશસ્તત્વભાવસ્તપોનિધિઃ ॥

તરુણસ્તારકસ્તામ્રસ્તરિષ્ણુસ્તત્વબોધકઃ ।
ત્રિધામા ત્રિજ્જગદ્ધેતુઃ ત્રિમૂર્તિસ્તિર્યગૂર્ધ્વગઃ ॥ ૪૨ ॥

ત્રિમાતૃકસ્ત્રિવૃદ્રૂપઃ તૃતીયસ્ત્રિગુણાધિકઃ ।
દક્ષાધ્વરહરો દક્ષો દહરસ્થો દયાનિધિઃ ॥ ૪૩ ॥

દક્ષિણાગ્નિર્ગાર્હપત્યો દમનો દાનવાન્તકઃ ।
દીર્ઘપિઙ્ગજટાજૂટો દીર્ઘબાહુર્દિગમ્બરઃ ॥ ૪૪ ॥

દુરારાધ્યો દુરાધર્ષો દુષ્ટદૂરો દુરાસદઃ ।
દુર્વિજ્ઞેયો દુરાચારનાશનો દુર્મદાન્તકઃ ॥ ૪૫ ॥

દૈવ્યો ભિષક્ પ્રમાણજ્ઞો બ્રહ્મણ્યો બ્રાહ્મણાત્મકઃ ।
દ્રષ્ટા દર્શયિતા દાન્તો દક્ષિણામૂર્તિરૂપભૃત્ ॥ ૪૬॥

ધન્વી ધનાધિપો ધન્યો ધર્મગોપ્તા ધરાધિપઃ ।
ધૃષ્ણુર્દૂતસ્તીક્ષ્ણદંષ્ટ્રસ્સુધન્વા સુતદઃ સુખી ॥ ૪૭॥

ધ્યાનગમ્યો ધ્યાતૃરૂપો ધ્યેયો ધર્મવિદાં વરઃ ।
નક્તઞ્ચરઃ પ્રકૃન્તાનાં પતિર્ગિરિચરો ગુરુઃ ॥ ૪૮॥

નન્દિનાટ્યપ્રિયો નન્દી નટેશો નટવેષભૃત્ ।
નમદાનન્દદો નમ્યો નગરાજનિકેતનઃ ॥ ૪૯॥

નારસિંહો નગાધ્યક્ષો નાદાન્તો નાદવર્જિતઃ ।
નિચેરુકઃ પરિચરોઽરણ્યાનાં પતિરદ્ભુતઃ ॥ ૫૦॥

નિરઙ્કુશો નિરાધારો નિરપાયો નિરત્યયઃ ।
નિરઞ્જનો નિત્યશુદ્ધો નિત્યબુદ્ધો નિરાશ્રયઃ ॥ ૫૧॥

નિરંશો નિગમાનન્દો નિરાનન્દો નિદાનભૂઃ ।
નિર્વાણદો નિર્વૃતિસ્થો નિર્વૈરો નિરુપાધિકઃ ॥ ૫૨॥

નિર્વિકલ્પો નિરાલમ્બો નિર્વિકારો નિરામયઃ ।
નિષઙ્ગીષુધિમાનિન્દ્રસ્તસ્કરાણામધીશ્વરઃ ॥ ૫૩॥

નિસ્પન્દઃ પ્રત્યયાનન્દો નિર્નિમેષો નિરન્તરઃ ।
નૈષ્કર્મ્યદો નવરસઃ ત્રિસ્થસ્ત્રિપુરભૈરવઃ ॥ ૫૪॥

પઞ્ચભૂતપ્રભુઃ પઞ્ચપૂજાસન્તુષ્ટમાનસઃ ।
પઞ્ચયજ્ઞપ્રિયઃ પઞ્ચપ્રાણાધિપતિરવ્યયઃ ॥ ૫૫॥

પતઞ્જલિપ્રાણનાશ્ચ પરાપરવિવર્જિતઃ ।
પતિઃ પઞ્ચત્વનિર્મુક્તઃ પઞ્ચકૃત્યપરાયણઃ ॥ ૫૬॥

પત્તીનામધિપઃ કૃત્સ્નવીતો ધાવંશ્ચ સત્ત્વપઃ ।
પરમાત્મા પરં જ્યોતિઃ પરમેષ્ઠી પરાત્પરઃ ॥ ૫૭॥

પર્ણશદ્યઃ પ્રત્યગાત્મા પ્રસન્નઃ પરમોન્નતઃ ।
પવિત્રઃ પાર્વતીદારઃ પરમાપન્નિવારકઃ ॥ ૫૮॥

પાટલાશ્મુઃ પટુતરઃ પારિજાતદ્રુમૂલગઃ ।

પાપાટવીબૃહદ્ભાનુઃ ભાનુમત્કોટિકોટિભઃ ॥ ૫૯॥

પાશી પાતકસંહર્તા તીક્ષ્ણેષુસ્તિમિરાપહઃ ।
પુણ્યઃ પુમાન્પુરિશયઃ પૂષા પૂર્ણઃ પુરાતનઃ ॥ ૬૦॥

પુરજિત્પૂર્વજઃ પુષ્પહાસઃ પુણ્યફલપ્રદઃ ।
પુરુહૂતઃ પુરદ્વેષી પુરત્રયવિહારવાન્ ॥ ૬૧॥

પુલસ્ત્યઃ ક્ષયણો ગૃહ્યો ગોષ્ઠ્યો ગોપરિપાલકઃ ।
પુષ્ટાનાં પતિરવ્યગ્રો ભવહેતિર્જગત્પતિઃ ॥ ૬૨॥

પ્રકૃતીશઃ પ્રતિષ્ઠાતા પ્રભવઃ પ્રમથઃ પ્રથી ।
પ્રપઞ્ચોપશમો નામરૂપદ્વયવિવર્જિતઃ ॥ ૬૩॥

પ્રપઞ્ચોલ્લાસનિર્મુક્તઃ પ્રત્યક્ષઃ પ્રતિભાત્મકઃ
પ્રબુદ્ધઃ પરમોદારઃ પરમાનન્દસાગરઃ ॥ ૬૪॥

પ્રમાણઃ પ્રણવઃ પ્રાજ્ઞઃ પ્રાણદઃ પ્રાણનાયકઃ ।
પ્રવેગઃ પ્રમદાર્ધાઙ્ગઃ પ્રનર્તનપરાયણઃ ॥ ૬૫॥

બભ્રુર્બહુવિધાકારો બલપ્રમથનો બલી ।
બભ્રુશો ભગવાન્ભાવ્યો વિવ્યાધી વિગતજ્વરઃ ॥ ૬૬॥

બિલ્મી વરૂથી દુન્દુભ્યાહનન્યૌ પ્રમૃશાભિધઃ ।
બ્રહ્મવિદ્યાગુરુર્ગુહ્યો ગુહ્યકૈસ્સમભિષ્ટુતઃ ॥ ૬૭॥

બ્રહ્મવિદ્યાપ્રદો બ્રહ્મ બૃહદ્ગર્ભો બૃહસ્પતિઃ ।
બ્રહ્માણ્ડકાણ્ડવિસ્ફોટમહાપ્રલયતાણ્ડવઃ ॥ ૬૮॥

બ્રહ્મિષ્ઠો બ્રહ્મસૂત્રાર્થો બ્રહ્મણ્યો બ્રહ્મચેતનઃ ।
ભગનેત્રહરો ભર્ગો ભવઘ્નો ભક્તિમન્નિધિઃ ॥ ૬૯॥

ભદ્રો ભદ્રપ્રદો ભદ્રવાહનો ભક્તવત્સલઃ ।
ભાવજ્ઞો બન્ધવિચ્છેત્તા ભાવાતીતોઽભયઙ્કરઃ ॥ ૭૦॥

ભાવાભાવવિનિર્મુક્તો ભારૂપો ભાવિતો ભરઃ ।
ભૂતમુક્તાવલીતન્તુઃ ભૂતપૂર્વો ભુજઙ્ગભૃત્ ॥ ૭૧॥

ભૂમા ભૂતપતિર્ભવ્યો ભૂર્ભુવોવ્યાહૃતિપ્રિયઃ ।
ભૃઙ્ગિનાટ્યપ્રમાણજ્ઞો ભ્રમરાયિતનાટ્યકૃત્ ॥ ૭૨॥

ભ્રાજિષ્ણુર્ભાવનાગમ્યો ભ્રાન્તિજ્ઞાનવિનાશનઃ ।
મનીષી મનુજાધીશો મિથ્યાપ્રત્યયનાશનઃ ॥ ૭૩॥

મનોભર્તા મનોગમ્યો મનનૈકપરાયણઃ ।
મનોવચોભિરગ્રાહ્યો મહાબિલકૃતાલયઃ ॥ ૭૪॥

મયસ્કરો મહાતિર્થ્યઃ કૂલ્યઃ પાર્યઃ પદાત્મકઃ ।
મહર્દ્ધિર્મહિમાધારો મહાસેનગુરુર્મહઃ ॥ ૭૫॥

મહાકર્તા મહાભોક્તા મહાસંવિન્મયો મધુઃ ।
મહાતાત્પર્યનિલયઃ પ્રત્યગ્બ્રહ્મૈક્યનિશ્ચયઃ ॥ ૭૬॥

મહાનન્દો મહાસ્કન્દો મહેન્દ્રો મહસાન્નિધિઃ ।
મહામાયો મહાગ્રાસો મહાવીર્યો મહાભુજઃ ॥ ૭૭॥

મહોગ્રતાણ્ડવાભિજ્ઞઃ પરિભ્રમણતાણ્ડવઃ ।
માણિભદ્રાર્ચિતો માન્યો માયાવી માન્ત્રિકો મહાન્ ॥ ૭૮॥

માયાનાટકકૃન્માયી માયાયન્ત્રવિમોચકઃ ।
માયાનાટ્યવિનોદજ્ઞો માયાનટનશિક્ષકઃ ॥ ૭૯॥

મીઢુષ્ટમો મૃગધરો મૃકણ્ડુતનયપ્રિયઃ ।
મુનિરાતાર્ય આલાદ્યઃ સિકત્યશ્ચ કિઁશિલઃ ॥ ૮૦॥

મોચકો મોહવિચ્છેત્તા મોદનીયો મહાપ્રભુઃ ।
યશસ્વી યજમાનાત્મા યજ્ઞભુગ્યજનપ્રિયઃ ॥ ૮૧॥

યક્ષરાડ્યજ્ઞફલદો યજ્ઞમૂર્તિર્યશસ્કરઃ ।
યોગગમ્યો યોગનિષ્ઠો યોગાનન્દો યુધિષ્ઠિરઃ ॥ ૮૨॥

યોગયોનિર્યથાભૂતો યક્ષગન્ધર્વવન્દિતઃ ।
રવિમણ્ડલમધ્યસ્થો રજોગુણવિવર્જિતઃ ॥ ૮૩॥

રાજરાજેશ્વરો રમ્યો રાત્રિઞ્ચર વિનાશનઃ ।
રાતિર્દાતિશ્ચતુષ્પાદઃ સ્વાત્મબન્ધહરઃ સ્વભૂઃ ॥ ૮૪॥

રુદ્રાક્ષસ્રઙ્મયાકલ્પઃ કહ્લારકિરણદ્યુતિઃ ।
રોહિતસ્સ્થપતિર્વૃક્ષપતિર્મન્ત્રી ચ વાણિજઃ ॥ ૮૫॥

લાસ્યામૃતાબ્ધિલહરીપૂર્ણેન્દુઃ પુણ્યગોચરઃ ।
વરદો વામનો વન્દ્યો વરિષ્ઠો વજ્રવર્મભૃત્ ॥ ૮૬॥

વરાભયપ્રદો બ્રહ્મપુચ્છો બ્રહ્મવિદાં વરઃ ।
વશી વરેણ્યો વિતતો વજ્રભૃદ્વરુણાત્મકઃ ॥ ૮૭॥

વહ્નિમણ્ડલમધ્યસ્થો વર્ષીયાન્ વરુણેશ્વરઃ ।
વાચ્યવાચકનિર્મુક્તો વાગીશો વાગગોચરઃ ॥ ૮૮॥

વિકારરહિતો વિષ્ણુર્વિરાડીશો વિરાણ્મયઃ ।
વિઘ્નેશ્વરો વિઘ્નનેતા શક્તિપાણિઃ શરોદ્ભવઃ ॥ ૮૯॥

વિજિઘત્સો વિગતભીર્વિપિપાસો વિભાવના ।
વિદગ્ધમુગ્ધવેષાઢ્યો વિશ્વાતીતો વિશોકદઃ ॥ ૯૦॥

વિદ્યાનિધિર્વિરૂપાક્ષો વિશ્વયોનિર્વૃષધ્વજઃ ।
વિદ્યુત્યો વિવહો મેધ્યો રેષ્મિયો વાસ્તુપો વાસઃ ॥ ૯૧॥

વિદ્વત્તમો વિદૂરસ્થો વિશ્રમો વેદનામયઃ ।
વિયદાદિજગત્સ્રષ્ટા વિવિધાનન્દદાયકઃ ॥ ૯૨॥

વિરાટ્હૃદયપદ્મસ્થો વિધિર્વિશ્વાધિકો વિભુઃ ।
વિરૂપો વિશ્વદિગ્વ્યાપી વીતશોકો વિરોચનઃ ॥ ૯૩॥

વિશ્રાન્તિભૂર્વિવસનો વિઘ્નહન્તા વિનોદકઃ ।
વિશૃઙ્ખલો વિયદ્ધેતુર્વિષમો વિદ્રુમપ્રભઃ ॥ ૯૪॥

વિશ્વસ્યાયતનો વર્યો વન્દારુજનવત્સલ ।
વિજ્ઞાનમાત્રો વિરજા વિરામો વિબુધાશ્રય ॥ ૯૫॥

વીરપ્રિયો વીતભયો વિન્ધ્યદર્પવિનાશન ।
વીરભદ્રો વિશાલાક્ષો વિષ્ણુબાણો વિશાં પતિઃ ॥ ૯૬॥

વૃદ્ધિક્ષયવિનિર્મુક્તો વિદ્યોતો વિશ્વવઞ્ચકઃ ।
વેતાલનટનપ્રીતો વેતણ્ડત્વક્કૃતામ્બરઃ ॥ ૯૭॥

વેદવેદ્યો વેદરૂપો વેદવેદાન્તવિત્તમઃ ।
વેદાન્તકૃત્તુર્યપાદો વૈદ્યુતઃ સુકૃતોદ્ ભવઃ ॥ ૯૮॥

વેદાર્થવિદ્વેદયોનિઃ વેદાઙ્ગો વેદસંસ્તુતઃ ।
વેલાતિલઙ્ઘિકરુણો વિલાસી વિક્રમોન્નતઃ ॥ ૯૯॥

વૈકુણ્ઠવલ્લભોઽવર્ષ્યો વૈશ્વાનરવિલોચનઃ ।

વૈરાગ્યશેવધિર્વિશ્વભોક્તા સર્વોર્ધ્વસંસ્થિતઃ ॥ ૧૦૦॥

વૌષટ્કારો વષટ્કારો હુઙ્કારઃ ફટ્કરઃ પટુઃ ।
વ્યાકૃતો વ્યાપૃતો વ્યાપી વ્યાપ્યસાક્ષી વિશારદઃ ॥ ૧૦૧॥

વ્યાઘ્રપાદપ્રિયો વ્યાઘ્રચર્મધૃદ્વ્યાધિનાશનઃ ।
વ્યામોહનાશનો વ્યાસો વ્યાખ્યામુદ્રાલસત્કરઃ ॥ ૧૦૨॥

વ્યુપ્તકેશોઽથ વિશદો વિષ્વક્સેનો વિશોધકઃ ।
વ્યોમકેશો વ્યોમમૂર્તિર્વ્યોમાકારોઽવ્યયાકૃતિઃ ॥ ૧૦૩॥

વ્રાતો વ્રાતપતિર્વિપ્રો વરીયાન્ ક્ષુલ્લકઃ ક્ષમી ।
શક્તિપાતકરઃ શક્તઃ શાશ્વતઃ શ્રેયસાં નિધિઃ ॥ ૧૦૪॥

શયાનઃ શન્તમઃ શાન્તઃ શાસકઃ શ્યામલાપ્રિયઃ ।
શિવઙ્કરઃ શિવતરઃ શિષ્ટહૃષ્ટઃ શિવાગમઃ ॥ ૧૦૫॥

શીઘ્રિયશ્શીભ્ય આનન્દઃ ક્ષયદ્વીરશ્શરોઽક્ષરઃ ।
શુદ્ધસ્ફટિકસઙ્કાશઃ શ્રુતિપ્રસ્તુતવૈભવઃ ॥ ૧૦૬॥

શુષ્ક્યો હરિત્યો લોપ્યશ્ચ સૂર્મ્યઃ પર્ણ્યોઽણિમાદિભૂઃ ।
શૂરસેનઃ શુભાકારઃ શુભ્રમૂર્તિઃ શુચિસ્મિતઃ ॥ ૧૦૭॥

શઙ્ગઃ પ્રતરણોઽવાર્યઃ ફેન્યઃ શષ્પ્યઃ પ્રવાહજઃ ।
શ્રાવ્યઃ શત્રુહરઃ શૂલી શ્રુતિસ્મૃતિવિધાયકઃ ॥ ૧૦૮॥

શ્રીશિવઃ શ્રીશિવાનાથઃ શ્રીમાન્ શ્રીપતિપૂજિતઃ ।
શ્રુત્યઃ પથ્યસ્સ્વતન્ત્રસ્થઃ કાટ્યો નીપ્યઃ કરોટિભૃત્ ॥ ૧૦૯॥

ષડાધારગતઃ સાઙ્ખ્યઃ ષડક્ષરસમાશ્રયઃ ।
ષડૂર્મિરહિતઃ સ્તવ્યઃ ષડ્ગુણૈશ્વર્યદાયકઃ ॥ ૧૧૦॥

સકૃદ્વિભાતઃ સંવેત્તા સદસત્કોટિવર્જિતઃ ।
સત્ત્વસંસ્થઃ સુષુપ્તિસ્થઃ સુતલ્પઃ સત્સ્વરૂપગઃ ॥ ૧૧૧॥

સદ્યોજાતઃ સદારાધ્યઃ સામગઃ સામસંસ્તુતઃ ।
સનાતનઃ સમઃ સત્યઃ સત્યવાદી સમૃદ્ધિદઃ ॥ ૧૧૨॥

સમદૃષ્ટિઃ સત્યકામઃ સનકાદિમુનિસ્તુતઃ ।
સમસ્તભુવનવ્યાપી સમૃદ્ધઃ સતતોદિતઃ ॥ ૧૧૩॥

સર્વકૃત્સર્વજિત્સર્વમયઃ સત્વાવલમ્બકઃ ।
સર્વદ્વન્દ્વક્ષયકરઃ સર્વાપદ્વિનિવારકઃ ॥ ૧૧૪॥

સર્વદૃક્ સર્વભૃત્સર્ગઃ સર્વહૃત્કોશસંસ્થિતઃ ।
સર્વપ્રિયતમઃ સર્વદારિદ્ર્યક્લેશનાશનઃ ॥ ૧૧૫॥

સર્વવિદ્યાનામીશાન ઈશ્વરાણામધીશ્વરઃ ।
સર્વજ્ઞઃ સર્વદઃ સ્થાણુઃ સર્વેશઃ સમરપ્રિયઃ ॥ ૧૧૬॥

સર્વાતીતઃ સારતરઃ સામ્બઃ સારસ્વતપ્રદઃ ।
સર્વાર્થઃ સર્વદા તુષ્ટઃ સર્વશાસ્ત્રાર્થસમ્મતઃ ॥ ૧૧૭॥

સર્વેશ્વરઃ સર્વસાક્ષી સર્વાત્મા સાક્ષિવર્જિતઃ ।
સવ્યતાણ્ડવસમ્પન્નો મહાતાણ્ડવવૈભવઃ ॥ ૧૧૮॥

સસ્પિઞ્જરઃ પશુપતિસ્ત્વિષીમાનધ્વનાં પતિઃ ।
સહમાનસ્સત્યધર્મા નિવ્યાધી નિયમો યમઃ ॥ ૧૧૯॥

સહસ્રાક્ષઃ સહસ્રાઙ્ઘ્રિઃ સહસ્રવદનામ્બુજઃ ।
સહસ્રાક્ષાર્ચિતઃ સમ્રાટ્ સન્ધાતા સમ્પદાલયઃ ॥ ૧૨૦॥

સિદ્ધેશઃ સિદ્ધિજનકઃ સિદ્ધાન્તઃ સિદ્ધવૈભવઃ ।
સુધારૂપઃ સુરાધ્યક્ષઃ સુભ્રૂઃ સુખઘનઃ સુધીઃ ॥ ૧૨૧॥

સુનિશ્ચિતાર્થો રાદ્ધાન્તઃ તત્ત્વમર્થસ્તપોમયઃ ।
સુવ્રતઃ સત્યસઙ્કલ્પઃ સ્વસંવેદ્યઃ સુખાવહઃ ॥ ૧૨૨॥

સૂતઃ સદસ્પતિઃ સૂરિરહન્ત્યો વનપો વરઃ ।
સૂત્રભૂતઃ સ્વપ્રકાશઃ સમશીલઃ સદાદયઃ ॥ ૧૨૩॥

સૂત્રાત્મા સુલભઃ સ્વચ્છઃ સૂદરઃ સુન્દરાનનઃ ।
સૂદ્યસ્સરસ્યો વૈશન્તો નાદ્યોઽવટ્યોટચોઽથ વર્ષકઃ ॥ ૧૨૪॥

સૂક્ષ્માત્સૂક્ષ્મતરઃ સૂર્યઃ સૂક્ષ્મસ્થૂલત્વવર્જિતઃ ।
સૃકાવી મુષ્ણતાં નાથઃ પઞ્ચાશદ્વર્ણરૂપભૃત્ ॥ ૧૨૫॥

સોમમણ્ડલમધ્યસ્થઃ સોમઃ સૌમ્યઃ સુહૃદ્વરઃ ।
સઙ્કલ્પોલ્લાસનિર્મુક્તઃ સમનીરાગચેતનઃ ॥ ૧૨૬॥

સમ્પન્નઃ સઙ્ક્રમઃ સત્રી સન્દાતા સકલોર્જિતઃ ।
સમ્પ્રવૃદ્ધઃ સન્નિકૃષ્ટઃ સંવિમૃષ્ટઃ સમગ્રદૃક્ ॥ ૧૨૭॥

સમ્પ્રહૃષ્ટઃ સન્નિવિષ્ટઃ સંસ્પષ્ટઃ સમ્પ્રમર્દનઃ ।
સંયદ્વામઃ સંયમીન્દ્રઃ સંશયચ્છિત્ સહસ્રદૃક્ ॥ ૧૨૮॥

સંયમસ્થઃ સંહૃદિસ્થઃ સમ્પ્રવિષ્ટઃ સમુત્સુકઃ ।
સંવત્સરઃ કલાપૂર્ણસ્સુરાસુરનમસ્કૃતઃ ॥ ૧૨૯॥

સંવર્તાગ્ન્યુદરઃ સર્વાન્તરસ્થસ્સર્વદુર્ગ્રહઃ ।
સંશાન્તસર્વસઙ્કલ્પઃ સંસદીશઃ સદોદિતઃ ॥ ૧૩૦॥

સ્ફુરડ્ડમરુનિધ્વાનનિર્જિતામ્ભોધિનિસ્વનઃ ।
સ્વચ્છન્દઃ સ્વચ્છસંવિત્તિરન્વેષ્ટવ્યોઽશ્રુતોઽમતઃ ॥ ૧૩૧॥

સ્વાત્મસ્થઃ સ્વાયુધઃ સ્વામી સ્વાનન્યઃ સ્વાંશિતાખિલઃ ।
સ્વાહારૂપો વસુમનાઃ વટુકઃ ક્ષેત્રપાલકઃ ॥ ૧૩૨॥

હિતઃ પ્રમાતા પ્રાગ્વર્તી સર્વોપનિષદાશયઃ ।
હિરણ્યબાહુસ્સેનાનીર્હરિકેશો દિશામ્પતિઃ ॥ ૧૩૩॥

હેતુદૃષ્ટાન્તનિર્મુક્તો હેતુર્હેરમ્બજન્મભૂઃ ।
હેયાદેયવિનિર્મુક્તો હેલાકલિતતાણ્ડવઃ ॥ ૧૩૪॥

હેલાવિનિર્મિતજગદ્ધેમશ્મશ્રુર્હિરણ્મયઃ ।
જ્ઞાનલિઙ્ગો ગતિર્જ્ઞાની જ્ઞાનગમ્યોઽભાસકઃ ॥ ૧૩૫॥

ઉત્તર પીઠિકા ।
ઇતિ કુઞ્ચિતપાદસ્ય નટરાજસ્ય સુન્દરમ્ ।
નામ્નાં સહસ્રં સમ્પ્રોક્તં મયા દેવિ ત્વદાદરાત્ ॥ ૧॥

સર્વમન્ત્રમયં હ્યેતત્ ન પ્રકાશ્યં કદાચન ।
સચ્છિષ્યાય વિનીતાય ભક્તાય નટનાયકે ॥ ૨॥

કરાઙ્ગન્યાસસંયુક્તં પ્રોક્તવ્યં ધ્યાનસંયુતમ્ ।
કન્યાર્થી લભતે કન્યાં ધનાર્થી ધનમાપ્નુયાત્ ॥ ૩॥

વિદ્યાર્થી લભતે વિદ્યાં પુત્રાર્થી પુત્રમાપ્નુયાત્ ।
યદ્યત્ પ્રાર્થયતે મર્ત્યઃ તત્સર્વં લભતે ધ્રુવમ્ ॥ ૪॥

સર્વસિદ્ધિકરં પુણ્યં સર્વવિદ્યાવિવર્દ્ધનમ્ ।
સર્વસમ્પત્પ્રદમિદં સર્વાપદ્દ્ઘ્નમઘાપહમ્ ॥ ૫॥

આભિચારપ્રયોગાદિમહાકૃત્યાનિવારણમ્ ।
અપસ્મારમહાવ્યાધિજ્વરકુષ્ઠાદિનાશનમ્ ॥ ૬॥

અત્યુત્પાતભયક્ષોભક્ષુદ્રવારણકારણમ્ ।
કૂશ્માણ્ડરુદ્રવેતાલશાકિન્યાદિભયાપહમ્ ॥ ૭॥

સ્મરણાદેવ જન્તૂનાં બ્રહ્મહત્યાદિનાશનમ્ ।
અસ્માત્પરતરં સ્તોત્રં નાસ્તિ લોકત્રયેઽમ્બિકે ॥ ૮॥

એતન્નામસહસ્રસ્ય પઠનાત્સકૃદેવ હિ ।
મહાપાતકયુક્તોઽપિ શિવસાયુજ્યમાપ્નુયાત્ ॥ ૯॥

પ્રયોગલક્ષણં વક્ષ્યે શ‍ૃણુ શૈલસુતેઽધુના ।
પઞ્ચમ્યામથવાષ્ટમ્યાં દશમ્યાં વા વિશેષતઃ ॥ ૧૦॥

સ્નાત્વા શુભાસને સ્થિત્વા ધ્યાયન્ શ્રીનટનાયકમ્ ।
પ્રજપેત્દ્વાદશાવૃત્યા સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૧॥

આર્દ્રાયાં પ્રાતરારભ્ય નટનાથસ્ય સન્નિધૌ ।
આસાયં પ્રજપેદેતત્ એવં સંવત્સરત્રયમ્ ॥ ૧૨॥

તસ્ય ભક્તસ્ય દેવેશઃ નટનં દર્શયેત્પ્રભુઃ ।
બિલ્વવૃક્ષસ્ય નિકટે પ્રદોષે પ્રજપેદિદમ્ ॥ ૧૩॥

ષડ્ભિર્માસૈમહૈશ્વર્યં લભતે નચિરાન્નરઃ ।
અનેન સ્તોત્રરાજેન મન્ત્રિતં ભસ્મ ધારયેત્ ॥ ૧૪॥

ભસ્માવલોકનાન્મૃત્યુર્વશ્યો ભવતિ તત્ક્ષણાત્ ।
સલિલં પ્રાશયેદ્ધીમાન્મન્ત્રેણાનેન મન્ત્રિતમ્ ॥ ૧૫॥

સર્વવિદ્યામયો ભૂત્વા વ્યાકરોત્યશ્રુતાદિકમ્ ।
નાટકાદિમહાગ્રન્થં કુરુતે નાત્ર સંશયઃ ॥ ૧૬॥

ચતુર્થ્યન્તં સમુચ્ચાર્ય નામૈકં તુ તતો જપેત્ ।
પઞ્ચાક્ષરં તથા નામ્ના સહસ્રં પ્રજપેત્ક્રમાત્ ॥ ૧૭॥

એવં ત્રિવારં માસાનાં અષ્ટાવિંશતિકે ગતે ।
નિગ્રહાનુગ્રહૌ કર્તું શક્તિરસ્યોપજાયતે ॥ ૧૮॥

નામ્નામાદૌ તથાન્તે ચ પઞ્ચાક્ષરમહામનુમ્ ।
જપ્ત્વા મધ્યસ્થિતં નામ નિર્નમોન્તં સદાઽસકૃત્ ॥ ૧૯॥

ચતુર્થ્યન્તં જપેદ્ધીમાન્ ત્રિવર્ષં ચ ત્રિવારકૈઃ ।
અણિમાદિમહાસિદ્ધિમચિરાત્પ્રાપ્નુયાદ્ધ્રુવમ્ ॥ ૨૦॥

સર્વેષ્વપિ ચ લોકેષુ સિદ્ધસ્સન્નાચરેન્નરઃ ।
લક્ષ્મીબીજદ્વયક્ષિપ્તમાદ્યન્તે નામ યશ્શિવે ॥ ૨૧॥

વાઞ્છિતાં શ્રિયમાપ્નોતિ સત્યમુક્તં વરાનને ।
હૃલ્લેખામન્ત્રસંયુક્તં પૂર્વવત્સંયુતં જપેત્ ॥ ૨૨॥

યોગસિદ્ધિર્ભવેત્તસ્ય ત્રિચતુઃ પઞ્ચવત્સરૈઃ ।
કિમત્ર બહુનોક્તેન યા યા સિદ્ધિરભીપ્સિતા ॥ ૨૩॥

સા સા સિદ્ધિર્ભવેદસ્ય સત્યમેવ મયોદિતમ્ ।
કણ્ઠદઘ્નજલે સ્થિત્વા ત્રિવારં પ્રજપેદિદમ્ ॥ ૨૪॥

રિપૂનુચ્ચાટયેચ્છીઘ્રમેકેનૈવ દિનેન સઃ ।
દક્ષિણાભિમુખો ભૂત્વા ધૃત્વાર્દ્રવસનં શુચિઃ ॥ ૨૫॥

શત્રુનામ સમુચ્ચાર્ય મારયેતિ પદાઙ્કિતમ્ ।
પઠેદિમં સ્તવં ક્રોધાત્સપ્તકૃત્વઃ ત્રિભિર્દિનૈઃ ॥ ૨૬॥

સ રિપુર્મૃત્યુગેહસ્ય ધ્રુવમાતિથ્યભાગ્ભવેત્ ।
હરિદ્રયા નટાધીશં કૃત્વા પ્રાણાન્પ્રતિષ્ઠિપેત્ ॥ ૨૭॥

પીતપુષ્પૈસ્સમભ્યર્ચ્ય સ્તોત્રમેતજ્જપેન્નરઃ ।
સ્તમ્ભયેત્સકલાન્ લોકાન્ કિમિહ ક્ષુદ્રમાનુષાન્ ॥ ૨૮॥

આકર્ષણાય સર્વેષામુત્તરાભિમુખો જપેત્ ।
વાઞ્છિતાઃ યોષિતસ્સર્વાસ્તથા લોકાન્તરસ્થિતાઃ ॥ ૨૯॥

યક્ષાશ્ચ કિન્નરાશ્ચાપિ રાજાનો વશમાપ્નુયુઃ ।
કુમ્ભસ્થિતં જલં સ્પૃષ્ટ્વા ત્રિવારં પ્રજપેદિદમ્ ॥ ૩૦॥

મહાગ્રહગણગ્રસ્તાનભિષેકં તુ કારયેત્ ।
જલદર્શનમાત્રેણ મુચ્યતે ચ ગ્રહાદિભિઃ ॥ ૩૧॥

અકારાદિક્ષકારાન્તનામગ્રથિતમુત્તમમ્ ।
સ્તોત્રમેતજ્જપિત્વા ચ પઠિત્વા શ્રિયમાપ્નુયાત્ ॥ ૩૨॥

પૂજયિત્વા નામભિશ્ચ નટેશપ્રીતિભાગ્ભવેત્ ।

કિમત્ર બહુનોક્તેન સિદ્ધ્યન્ત્યખિલસિદ્ધયઃ ॥ ૩૩॥

સાક્ષાન્નટેશ્વરો દેવો વશ્યો ભવતિ શૈલજે ।
અસ્માત્પરતરા સિદ્ધિઃ કા વાસ્તિ કથય પ્રિયે ॥ ૩૪॥

નિષ્કામસ્ત્વચિરાદેવ બ્રહ્મજ્ઞાનમવાપ્નુયાત્ ।
તસ્માત્સર્વપ્રયત્નેન યતિભિર્બ્રહ્મચારિભિઃ ॥ ૩૫॥

વનસ્થૈશ્ચ ગૃહસ્થૈશ્ચ સર્વૈર્જપ્યં પ્રયત્નતઃ ।
નિત્યકર્મવદેવેદં સ્તોત્રં જપ્યં સદાદરાત્ ॥ ૩૬॥

બ્રહ્માદયોઽપિ યન્નામપાઠસ્યૈવ પ્રસાદતઃ ।
સૃષ્ટિસ્થિત્યન્તકર્તારો જગતાં ચિરજીવિનઃ ॥ ૩૭॥

અન્યે ચ મુનયસ્સર્વે હયગ્રીવાદયઃ પુરા ।
પઠિત્વા પરમાં સિદ્ધિં પુનરાવૃત્તિવર્જિતામ્ ॥ ૩૮॥

લેભિરે તદિદં સ્તોત્રં પઠ ત્વમપિ શૈલજે ।
અસ્માત્પરતરં વેદ્યં નાસ્તિ સત્યં મયોદિતમ્ ॥ ૩૯॥

॥ શ્રીભૃઙ્ગિરિટિ સંહિતાયાં શ્રીશિવકામસુન્દરીસમેત શ્રી
નટરાજરાજ કુઞ્ચિતપાદસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શિવમ્ ॥

તતઃ ચિન્તામણિમન્ત્રેણ અઙ્ગન્યાસં, ધ્યાયેત્કોટિ રવિપ્રભમિતિ
ફાલેરત્નત્રિપુણ્ડ્રં ઇતિ ધ્યાનં લં પૃથિવ્યાત્મન
ઇતિ પઞ્ચ પૂજાં ચ કુર્યાત્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિક્વિમોકઃ ઇતિ તુ વિશેષઃ ।
ચિન્તામણિ મન્ત્રઃ સનિયમં ગુરૂપદેશાત્ જ્ઞેયઃ ॥

યઃ શિવો નામરૂપાભ્યાં યા દેવી સર્વમઙ્ગલા ।
તયોઃ સંસ્મરણાન્નિત્યં સર્વતો જયમઙ્ગલમ્ ॥

॥ મહોત્સવયાત્રાક્રમઃ ॥

મઞ્ચે ચન્દ્રાર્કભૂતેષ્વપિ વૃષગજરાડ્રાજતાદ્રિષ્વથાશ્વૈઃ
સોમાસ્કન્દસ્વરૂપસ્સ્વયમુરુનયને ગોરથે માર્ગણો યઃ ।
સ્થિત્વા બ્રહ્મોત્સવેષુ ત્રિષુ ચ નટપતિઃ પ્રત્યહં વીથિયાત્રાં
કૃત્વા સ્નાત્વા સહ સ્વં પ્રવિશતિ શિવયા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥

મઙ્ગલં ચિત્સભેશાય મહનીયગુણાત્મને ।
ચક્રવર્તિનુતાય શ્રીનટરાજાય મઙ્ગલમ્ ॥

॥ નટરાજરાજઃ શુભમાતનોતુ ॥

Proofread by DPD

*shrInaTarAjakunchitapAdasahasranamastotram*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*